# काव्येषु महाकवि कालिदासस्य राजधर्म निरूपणम्

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य
(पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**Article Info**
Volume 3, Issue 6
Page Number : 176-179
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 10 Dec 2020
Published : 30 Dec 2020

**शोधसारांश:-** काव्यं समाजस्य दर्पण: भवति । अत: एव काव्येषु सर्वे समाजिक- विषया: अन्तर्भूता: भवन्ति । कालिदासस्य काव्ये सर्वत्र प्रतिपदं राजधर्म: प्रतिपादित: । इदं प्रतिभाति यद् धर्महीना राजनीति: वेश्येव विगर्हिता हेया च भवति । राजति, दीप्यते, रंजयति वा इति व्युत्पत्त्या राजशब्दो निष्पद्यते । कालिदासस्य काव्ये राजधर्मस्य परिपालनं सर्वत्र दृग्गोचरीभवति । ऋष्यागमनावसरे " कुशली कण्व" इति वचसा मनुना प्रतिपादितं राजधर्ममेवानुसरति कवि: । "पृथिवी - पति: प्रकृति - हिताय प्रवर्तताम्" इत्यनेनेदं सूचितम् यत् सप्तांगी प्रकृतिर्भवति तस्यायमभिप्रायो यन्न त्वात्मतुष्टये किन्तु पौर- श्रेणी - हिताय सर्वथा यतनीयमिति ।

**मुख्यशब्दा:-** दर्पण:, प्रजा:, मन:, राजधर्मा:, विद्वांस:, विधुरा:, सन्त:, प्रवृत्ति:।

काव्यं समाजस्य दर्पण: भवति । अत: एव काव्येषु सर्वे समाजिक- विषया: अन्तर्भूता: भवन्ति । अस्मिन् लेखे कालिदासस्य काव्येषु निरुपिता: राजधर्मविचारा: सूपत् प्रस्तुता: ।

**राष्ट्रेषु भारतं भव्यं भव्य: संस्कृतवाङ्मय: ।**
**तत्रत्या संस्कृतिर्धन्या: संस्कृतसाधका: ॥**
**मूर्धन्य: सुरभारत्या: कालिदासो महाकवि: ।**
**कृतित्त्वयशस्य यस्य शोभते सुरभारती ॥ तथास्तु ॥**

अखिल - कविकुलललामभूतस्य कविकुलगुरो: कालिदासस्य कविताकामिनी बहुजन हिताय, बहुजन सुखाय, सर्वलोकोपकाराय च वर्तत इति विदितचरमेव विदुषाम् । सम्प्रति राजधर्मविमुखा राजान: सततमात्मानं कलङ्कयन्ति । प्रजा: वंचयन्तीति व्यवहारं दृष्ट्वा चेखिद्यते मन: । अत: साम्प्रतिके युगे कालिदासस्य काव्ये वर्णिता: राजधर्मा: श्लाधनीया उपयोगिनश्च सन्ति । राजधर्म - निरूपणं कालिदासेन यादृशं कृतं स्वकीये काव्ये न तादृशमन्यत्र दृश्यते श्रूयते च । यत्तु काव्यगतं प्रयोजनं प्रतिपादयता मम्मटेनावादि-

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्य: परनिर्वृत्तये कान्ता सम्मिततयोपदेशयुजे ॥ '**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

तत्र वयमिदं विचारयामो यद् व्यवहारज्ञानाय राजादिगतोचिताचार - ज्ञानाय वा काव्यशास्त्रस्य परमावश्यकत्वमस्तीति सर्वथा काव्यस्यानुशीलनं कर्त्तव्यमेवेति प्रतिपादितं भवति । अतश्चावश्यकं प्रतिभाति यत् काव्यशास्त्राध्ययनं विना कृतश्रमाः अपि विद्वांसः समाजे समादरं नैव लभन्ते । किं बहुना काव्यशास्त्रापरिशील- नाल्लौकिकाचार-विचारव्यवहार - विज्ञान-विधुराः सन्तः राजनेतारः समाजे हास्यतां व्रजन्ति । अतः ते संसारयात्रा - निर्वाहाय राजधर्मपरिपालनाय च कालिदासीयां शिक्षामासादयेयुरिति मे मतिः । कालिदासस्य काव्ये सर्वत्र प्रतिपदं राजधर्मः प्रतिपादितः । इदं प्रतिभाति यद् धर्महीना राजनीतिः वेश्येव विगर्हिता हेया च भवति । अतः कालिदासेन धर्मानुमोदिता राजनीतिः स्वीकृता, अभिज्ञानशाकुन्तलस्य पंचमाङ्के कंचुकिनः उक्तिद्वारा -

**आचार इत्यवहितेन मया गृहीता**

**या वेत्रयष्टिरवरोध - गृहेषु राज्ञः ।**

**काले गते बहुतिथे मम सैव जाता**

**प्रस्थान - विक्लव-गतेरवलम्बनार्था । ' इति**

उपर्युक्त-पद्ये कविनाऽऽचारस्य चर्चा कृता । तत्र को नामाचारः इति प्रश्ने आचारो नियमः सत्सम्प्रदायो धर्मश्च निरूपितो भवति । स च सर्वथा पालनीयो ग्राह्यश्चेति धिया कथमपि राज्ञा न हेयः । " आचारहीनं न पुनन्ति वेदाः " "आचारः परमो धर्मः" इत्यादयो बहवो नियमाः राजानं प्रतिबोधयन्ति धर्मानुष्ठानाय । राजधर्ममनादृत्य राजानः कथमपि लोकान् रंजयितुं नैव प्रभवन्ति । तथैव कंचुकी प्रतिपादपति यद् " भोः कामं धर्मकार्यमनतिपात्यं देवस्य, तथाऽपीदानीमेव धर्मासनादुत्थिताय पुनरूप- रोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् । अथवा अविश्रमोऽयं लोकतन्त्राधिकारः"। उपर्युक्त - विवेचनया स्पष्टं प्रतिभाति यदिह लोकतन्त्रो वर्णाश्रम-लक्षितस्य प्रजाजनस्य योगक्षेमाय सर्वदैव राज्ञा भाव्यमिति । प्रथितमिदं यल्लोकतन्त्रो लोकाधीनः तन्त्राधिकारः प्रधानाधिकारो भवति । न हि स्वतन्त्रेण मनसा राज्ञा किमपि कर्तुं शक्यते किन्तु प्रजापालनाधिकारः प्रजानुरोधनैव सम्पादयितुं शक्यते । किं बहुना प्रजापालन - तत्परेण राज्ञा कथमपि विश्रमो नाश्रयणीय इति राजधर्मः । उक्तं हि तत्रैव-

**भानुः सकृद् युक्त-तुरंग एव रात्रिन्दिवं गन्धवहः प्रयाति ।**

**शेषः सदैवाहित भूमिभारः षष्ठांश-वृत्तेरपि धर्म एषः ॥**

अत्र पद्ये विश्रामानपेक्षस्य सार्वकालिक - प्रवृत्यात्मकस्य राजधर्मस्य वाक्यचतुष्टयेन प्रतिपादनं कविना कृतम् । विचारयन्तु सुधियो यद् भगवान् भास्करः सकृदेव रथे तुरङ्कमान् संयोज्य अविरतं पर्यटति । यतो हि कालात्मा भगवान् भास्करः क्षणमपि विश्रान्त्यपेक्षया यदि विलम्बते तर्हि कालगतिः कुण्ठिता स्यात् अव्यवस्था च भवेत्। जगत्-प्राणो मारूतः अहोरात्रमविरतं प्रयाति यदि क्षणमपि तिष्ठेत्तर्हि विनश्येयुरिमाः प्रजाः । एवमेव शेषोऽपि पृथ्वीमकम्पेन शिरसा धारयति । इत्थं चोर्ध्वलोकस्थौ सूर्यवायू, अधोलोकस्थो भगवाननन्तश्च यथा समुज्झित - निज-सुखाः सर्वदा परार्थमेव प्रयतन्ते तथैव साम्प्रतिकैः राजनेतृभिर्भाव्यमिति कालिदासस्याभिप्रायः । तथा च प्रजा-षष्ठांशभुजां राज्ञामपि स्वसुखमनपेक्ष्य सर्वथा प्रजापरिपालनं धर्म इति विज्ञेयः । धर्मासनस्थो हि राजा स्वापत्यनिर्विशेषं प्रजाजनान् परिपाल्य तान् स्वे स्वे कर्मणि नियोजयन् तेषां विवादांश्च शमयन् तन्निरूप - सर्गान् विधाय धन्यमात्मानं मन्यते । उक्तं हि -

**प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम् ।**

**यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥**

राज्ञः धर्मो विद्यते यत् स सर्वदेवात्मनः सुखादिसाधनमनपेक्षमाणः प्रजाजनस्य सुखसम्पादनार्थमविरतं प्रयासं कुर्यादिति । आत्मसुख - निरपेक्षा प्रजाजनसुख- सम्पादन - प्रयत्नात्मिका प्रवृत्तिः राज्ञः भवेदिति विवेचनेन प्रतिभाति सा च नैव सम्प्रति श्रूयते अनुभूयते वा ।

जनानां राज्ञां वा का चर्चा स्थावरादयोऽपि मूर्ध्ना मध्यन्दिन – देदीप्यमान– प्रचण्ड – मार्तण्ड – प्रखरांशुजालं सर्वदा सहमानाः स्वतलोपविष्टानां पथिकानां छायादानेनातपसन्तापं दूरीकुर्वन्ति । उक्तं हि तेनैव–

**स्वसुख - निरभिलाषः खिद्यसे लोकहेतोः**

**प्रतिदिनमथवा ते वृत्तिरेवं-विधैव ।**

**अनुभवति हि मूर्ध्वा पादपस्तीव्रमुष्णं**

**शमयति परितापं छायया संश्रितानाम् ॥**

एवमेव राजधर्म – निरूपणप्रसंगं सविस्तरं वर्णयता तेन प्रतिपादितं यत् विमार्गप्रस्थिताः जनाः सत्पथे स्थापनीयाः, दण्डेन दुर्वृत्ताः नियमनीयाः । यदुक्तं मनुना–

**तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम्,**

**ब्रह्मतेजोमयं दण्डमसृजत् परमेश्वरः ।**

**स्वराष्ट्रे न्याय - वृत्तिः स्यादग्रदण्डश्च शत्रुषु**

**सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥ '**

तथा च राज्ञः प्रथमं कर्त्तव्यं भवति यद् वैभवेन प्रजासु सर्वविध–सम्पत्ति – पोषणं कुर्यात् । कलह–शमनात् सुहृद्रक्षणात् पुत्रवत् प्रजा – परिपालनाद्राजा भवति । तथाहि–

**नियमयसि विमार्गप्रस्थितानात्तदण्डः**

**प्रशमयसि विवादं कल्पसे रक्षणाय ।**

**अतनुषु विभवेषु ज्ञातयः सन्तु नाम**

**त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥'**

यथा जलफलागमैर्धना वृक्षाश्च नम्राः भवन्ति तथैव परार्थघटकानां सत्– पुरुषेषु परोपकारिषु च नम्रत्वेन स्वभावत एव भवितव्यम् । उद्धता राजानः नैव प्रजापरिपालनाय समर्था इति सूचितम् । यस्य राज्ञः शासने निर्विघ्न – तपसो मुनयः धर्मक्रियासु प्रवर्तन्ते स राजा अभ्यर्थनीयो भवति । यथा तत्रैव प्रतिपादितम्–

**कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।**

**तमस्तपति धर्मांशौ कथमाविर्भविष्यति ॥ 2**

रघुवंशेऽपि कविना एवमेव सविस्तरं प्रतिपादितम्–

एतेन वर्णनेनेदं प्रतिभाति यत् प्रतापोपेतो राजा एव वर्णाश्रमक्रिया – प्रवर्तको भवति । राजति, दीप्यते, रंजयति वा इति व्युत्पत्त्या राजशब्दो निष्पद्यते । उक्तं हि तत्रैव " अर्थवान् खलु मे राजशब्दः" इति । कालिदासस्य काव्ये राजधर्मस्य परिपालनं सर्वत्र दृग्गोचरीभवति । ऋष्यागमनावसरे " कुशली कण्व" इति वचसा मनुना प्रतिपादितं राजधर्ममेवानुसरति कविः । उक्तं हि मनुना–

**ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।**

**वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥**

य: खलु राजा आत्मन: स्खलितमपि न जानाति स कथं प्रकृतिषु को जन: केन पथा प्रचरतीति वेत्स्यति ? तथा चात्मसम्बन्ध - विषयेऽपि सम्यगनुशीलनं कर्त्तव्यमिति राजधर्म: स्वयमसिद्ध: परान् कथं साधयेत् इति धिया स्वयमनभिज्ञ: कथं ब्रूयाद् यन्न प्रजासु मे पाप: कोऽपि विद्यते । एतावतात्मशुद्धि: सर्वथा समपेक्षिता विद्यते । न हि पापात्मा राजा कथमपि लोककल्याणाय प्रभवति । उक्तं हि-

**अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम् ।**

**प्रजासु क: केन पथा प्रयातीत्यशेषत: को नु विदाङ्करोतु ॥ '**

आर्त्तत्राणमपि राज्ञ: प्रथमं कर्त्तव्यमिति ज्ञात्वा प्रजासु भयं न स्यादित्यर्थं सर्वतोभावेन तेन यतनीयमिति । उक्तं हि तत्रैव-

**आर्त्तानां भयमपनेतुमात्तधन्वा,**

**दुष्यन्तस्तव शरणं भवत्विदानीम्॥ '**

राजधर्म-निरूपणावसरे भरतवाक्येऽपि साटोपं प्रकृतिहितादयो धर्मा: निरूपिता: । "पृथिवी - पति: प्रकृति - हिताय प्रवर्तताम्" इत्यनेनेदं सूचितम् यत् सप्तांगी प्रकृतिर्भवति तस्यायमभिप्रायो यन्न त्वात्मतुष्टये किन्तु पौर- श्रेणी - हिताय सर्वथा यतनीयमिति । प्रकृतिशब्देन स्वाम्यादिराख्याङ्गानि कथ्यन्ते । "राज्याङ्गानि प्रकृतय: इत्यमर: । " । याज्ञवल्क्येनापि प्रतिपादितम्-

**स्वामी जनपदोऽमात्य: कोशो दुर्गबल सृहत् ।**

**राज्यं सप्तप्रकृत्यङ्ग नीतिज्ञा: सम्प्रचक्षते ॥ '**

इत्थञ्च सप्ताङ्गप्रकृति-युक्तो राजा लोकविलक्षणो भवति । अतो राज्ञा बुद्ध्यादिसम्पन्नेन प्रकृत्यादि - युक्तेन च भवितव्यमिति । एवम्भूतो राजाऽप्रमत्तां भवति । अन्यथा राज्ञ: स्वरूप- हानिरपि भवितुमर्हतीति ध्येयम् । माघेनापि शिशुपालवधमहाकाव्ये स्वकीयं तात्पर्यमत्रैव रक्षितम् ।

**शिव कुमारमिश्रेण निरूपितं यथामति ।**

**संस्कृतस्य प्रचारार्थं राष्ट्रकल्याण वांछया ॥**

**सन्दर्भग्रन्था:**


1. काव्यप्रकाशे ?
2. अभिज्ञानशाकुन्तले -5-31
3. अभिज्ञानशाकुन्तले-5-41
4. अभिज्ञान शाकुन्तले - 5-51
5. अभिज्ञान शाकुन्तले-5-71
6. मनुस्मृतौ - 7.4.32 1
7. अभिज्ञानशाकुन्तले-5-81 2. अभिानशाकुन्तले- 5-14 1
8. मनुस्मृतौ- 1.271 4. अभिज्ञानशाकुन्तले - 6-261
9. अभिज्ञानशाकुन्तले - 6-27 1
10. याज्ञवल्क्यस्मृतौ - 3-531